## कुलालादिभ्यो वुञ् । (११८/१४९८)

तेन, कृते, सञ्ज्ञायाम् इति [1]चैतत्सर्वमनुवर्तते । कुलालादिभ्यः वुञ् प्रत्ययो भवति तेन कृतम् इत्येतस्मिन्नर्थे[2] सञ्ज्ञायां गम्यमानायाम्[3] । कौलालकम् । [4]वारुडकम् ।

कुलाल । [5]वरुड । चण्डाल । निषाद । कर्मार । सेना । [6]सिरिध्र । सेन्द्रिय । देवराज । परिषत् । [7]वधू । [8]रुरु । ध्रुव । रुद्र । अनडुह् । ब्रह्मन् । कुम्भकार । [9]श्वपाक । कुलालादिः ॥

## क्षुद्राभ्रमरवटरपादपादञ् । (११९/१४९९)

तेन, कृते, सञ्ज्ञायाम् इति [10]सर्वम[11]नुवर्तते । क्षुद्रादिभ्यः[12] अञ् प्रत्ययो भवति तेन कृते इत्येतस्मिन् विषये सञ्ज्ञायां गम्यमानायाम् । [13]अणोऽपवादः । [14]स्वरे विशेषः । क्षुद्रादिभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । [15]पादपम् ॥

## तस्येदम् । (१२०/१५००)

तस्य इति षष्ठीसमर्थाद् इदम् इत्येतस्मिन् [16]विषये यथाविहितं प्रत्ययो भवति । अणादयः पञ्च महोत्सर्गाः । घादयश्च प्रत्यया [17]यथाविहितं विधीयन्ते । प्रकृतिप्रत्ययार्थयोः षष्ठ्यर्थमात्रं [18]तत्सम्बन्धिमात्रं च विवक्षितं, यदपरं लिङ्गसङ्ख्याप्रत्यक्षपरोक्षादिकं [19]तत्सर्वमविवक्षितम् । उपगोरिदमौपगवम् । कापटवम् । राष्ट्रियम् । [20]अवारपारीणम् । अनन्तरादिष्वनभिधानान् न भवति, [21]देवदत्तस्यानन्तरम् इति ।

[४७०] संवहेस्तुरणिट् च । (म.भा. २.३१८)

संवोढुः स्वं सांवहित्रम् । सिद्धः एवात्राण्, इडर्थमुपसङ्ख्यानम् ।

[४७१] आग्नीधः शरणे रण् भं च । (म.भा. २.३१८)

[22]आग्नीध्रम् ।

[४७२] समिधामाधाने षेण्यण् । (म.भा. २.३१९)

सामिधेन्यो मन्त्रः । सामिधेनी ऋक् ॥

## रथाद्यत् । (१२१/१५०१)

रथशब्दात् यत् प्रत्ययो भवति तस्येदम् इत्येतस्मिन् [23]विषये । अणोऽपवादः । रथस्य इदं रथ्यं, चक्रं वा युगं वा । रथाङ्ग एवेष्यते, नान्यत्र अनभिधानात् ।

[४७३] रथसीताहलेभ्यो [24]यद्विधाविति तदन्तविधिरुपसङ्ख्यायते ।
परमरथ्यम् । उत्तमरथ्यम् ॥

---

1. एतत् नास्ति फ. 2. विषये ब. 3. अणोऽपवादः इत्यधिकम् फ. 4. चारुटकम् ड. 5. चरुट ड. 6. सरिध्र ब, सिरभ्र क, शिरन्ध्र ड, शिरद्य इ. 7. बभ्रु ब, बभ्रु क. 8. नास्ति फ. 9. आहक ड. 10. चैतत् इत्यधिकम् ब, एतत् इत्यधिकम् क. 11. वर्तते क. 12. प्रातिपदिकेभ्यः इत्यधिकम् फ. ह. 13. छाणोरपवादः ड. 14. स्वरादिविशेषः इ. 15. चातपम् इ. 16. अर्थे ब.क.फ. 17. यथायथं फ. 18. तत्सम्बन्धितामात्रं ब. 19. तत्सर्वमपि क. 20. अवारपारीणः ह, नास्ति फ. 21. देवदत्तस्य समीपम् फ. 22. अग्नीध्रः क. 23. अर्थे ह. 24. यद्विधानम् ड.